श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ पञ्चविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चविंशः सर्गः ॥

## रावणेन निगूढतया शुकसारणयोर्वानरसेनायां प्रेषणं, विभीषणेन तयोर्निग्रहणं, श्रीरामकृपया मोक्षणं तदीयं सन्देशमादाय ताभ्यां लङ्कां गत्वा रावणस्य प्रबोधनं च

सबले सागरं तीर्णे रामे दशरथात्मजे।
अमात्यौ रावणः श्रीमानब्रवीच्छुकसारणौ ॥ **6.25.1** ॥

समग्रं सागरं तीर्णं दुस्तरं वानरं बलम्।
अभूतपूर्वं रामेण सागरे सेतुबन्धनम् ॥ **6.25.2** ॥

सागरे सेतुबन्धं तं न श्रद्दध्यां कथञ्चन।
अवश्यं चापि सङ्ख्येयं तन्मया वानरं बलम् ॥ **6.25.3** ॥

भवन्तौ वानरं सैन्यं प्रविश्यानुपलक्षितौ।
परिमाणं च वीर्यं च ये च मुख्याः प्लवङ्गमाः ॥ **6.25.4** ॥

मन्त्रिणो ये च रामस्य सुग्रीवस्य च सम्मताः।
ये पूर्वमभिवर्तन्ते ये च शूराः प्लवङ्गमाः ॥ **6.25.5** ॥

स च सेतुर्यथा बद्धः सागरे सलिलार्णवे।
निवेशं च यथा तेषां वानराणां महात्मनाम् ॥ **6.25.6** ॥

रामस्य व्यवसायं च वीर्यं प्रहरणानि च।
लक्ष्मणस्य च वीरस्य तत्त्वतो ज्ञातुमर्हथः ॥ **6.25.7** ॥

कश्च सेनापतिस्तेषां वानराणां महात्मनाम्।
तच्च ज्ञात्वा यथातत्त्वं शीघ्रमागन्तुमर्हथः॥ **6.25.8** ॥

इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ।
हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम्॥ **6.25.9** ॥

ततस्तद् वानरं सैन्यमचिन्त्यं लोमहर्षणम्।
सङ्ख्यातुं नाध्यगच्छेतां तदा तौ शुकसारणौ॥ **6.25.10** ॥

तत् स्थितं पर्वताग्रेषु निर्झरेषु गुहासु च।
समुद्रस्य च तीरेषु वनेषूपवनेषु च।
तरमाणं च तीर्णं च तर्तुकामं च सर्वशः॥ **6.25.11** ॥

निविष्टं निविशच्चैव भीमनादं महाबलम्।
तद्बलार्णवमक्षोभ्यं ददृशाते निशाचरौ॥ **6.25.12** ॥

तौ ददर्श महातेजाः प्रतिच्छन्नौ विभीषणः।
आचचक्षे स रामाय गृहीत्वा शुकसारणौ॥ **6.25.13** ॥

तस्यैतौ राक्षसेन्द्रस्य मन्त्रिणौ शुकसारणौ।
लङ्कायाः समनुप्राप्तौ चारौ परपुरञ्जय॥ **6.25.14** ॥

तौ दृष्ट्वा व्यथितौ रामं निराशौ जीविते तथा।
कृताञ्जलिपुटौ भीतौ वचनं चेदमूचतुः॥ **6.25.15** ॥

आवामिहागतौ सौम्य रावणप्रहितावुभौ।
परिज्ञातुं बलं सर्वं तदिदं रघुनन्दन॥ **6.25.16** ॥

तयोस्तद् वचनं श्रुत्वा रामो दशरथात्मजः।
अब्रवीत् प्रहसन् वाक्यं सर्वभूतहिते रतः॥ **6.25.17** ॥

यदि दृष्टं बलं सर्वं वयं वा सुसमाहिताः।
यथोक्तं वा कृतं कार्यं छन्दतः प्रतिगम्यताम्॥ **6.25.18**॥

अथ किञ्चिददृष्टं वा भूयस्तद् द्रष्टुमर्हथः।
विभीषणो वा कार्त्स्न्येन पुनः सन्दर्शयिष्यति॥ **6.25.19**॥

न चेदं ग्रहणं प्राप्य भेतव्यं जीवितं प्रति।
न्यस्तशस्त्रौ गृहीतौ च न दूतौ वधमर्हथः॥ **6.25.20**॥

प्रच्छन्नौ च विमुञ्चेमौ चारौ रात्रिञ्चरावुभौ।
शत्रुपक्षस्य सततं विभीषण विकर्षिणौ॥ **6.25.21**॥

प्रविश्य महतीं लङ्कां भवद्भ्यां धनदानुजः।
वक्तव्यो रक्षसां राजा यथोक्तं वचनं मम॥ **6.25.22**॥

यद् बलं त्वं समाश्रित्य सीतां मे हृतवानसि।
तद् दर्शय यथाकामं ससैन्यश्च सबान्धवः॥ **6.25.23**॥

श्वः काल्ये नगरीं लङ्कां सप्राकारां सतोरणाम्।
रक्षसां च बलं पश्य शरैर्विध्वंसितं मया॥ **6.25.24**॥

क्रोधं भीममहं मोक्ष्ये ससैन्ये त्वयि रावण।
श्वः काल्ये वज्रवान् वज्रं दानवेष्विव वासवः॥ **6.25.25**॥

इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ।
जयेति प्रतिनन्द्यैनं राघवं धर्मवत्सलम्॥ **6.25.26**॥

आगम्य नगरीं लङ्कामब्रूतां राक्षसाधिपम्।
विभीषणगृहीतौ तु वधार्थं राक्षसेश्वर॥ **6.25.27**॥

दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा।
एकस्थानगता यत्र चत्वारः पुरुषर्षभाः॥ **6.25.28**॥

लोकपालसमाः शूराः कृतास्त्रा दृढविक्रमाः।
रामो दाशरथिः श्रीमान् लक्ष्मणश्च विभीषणः॥ **6.25.29** ॥

सुग्रीवश्च महातेजा महेन्द्रसमविक्रमः।
एते शक्ताः पुरीं लङ्कां सप्राकारां सतोरणाम्॥ **6.25.30** ॥

उत्पाट्य सङ्क्रामयितुं सर्वे तिष्ठन्तु वानराः।
यादृशं तद्धि रामस्य रूपं प्रहरणानि च॥ **6.25.31** ॥

वधिष्यति पुरीं लङ्कामेकस्तिष्ठन्तु ते त्रयः।
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी।
बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः॥ **6.25.32** ॥

प्रहृष्टयोधा ध्वजिनी महात्मनां
वनौकसां सम्प्रति योद्धुमिच्छताम्।
अलं विरोधेन शमो विधीयतां
प्रदीयतां दाशरथाय मैथिली॥ **6.25.33** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चविंशः सर्गः॥